# N 882

Seat Number

2026 II 25 1100 **-N 882-** SANSKRIT (27) (SECOND OR THIRD LANGUAGE) (SK)

(REVISED COURSE)

**Time : 3 Hours** **(Pages 19)** **Max. Marks : 80**

सूचना :

(1) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।


(2) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।

(3) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।

## प्रथमः विभागः—सुगमसंस्कृतम् 8

1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4) 4


(1)




(2)




(3)



(4)




(5)




P.T.O.

(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2) 2

(1) ८०

(2) १६

(3) पञ्चत्रिंशत्

(इ) समय-स्तम्भमेलनं कुरुत। 2

| | 'अ' | 'आ' |
|---|---|---|
| (1) | विंशत्यधिक-अष्टवादनम् | १०.०० |
| (2) | सार्ध-एकवादनम् | २.५० |
| (3) | दशोन-त्रिवादनम् | ८.२० |
| (4) | दशवादनम् | १.३० |

## द्वितीयः विभागः—गद्यम्

20

2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। 7

रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः। द्वादशवादने क्रीडायाः चरमबिन्दुः समायातः-सहभोजनम्। प्रेक्षकाणाम् उत्कण्ठायाः पराकाष्ठा जाता। सेवकः मञ्चे त्रीणि आसनानि स्थापितवान् मध्यभागे च वर्तुलाकारं पीठम्। अहम् एकस्मिन् आसने उपावेशितः। अत्रान्तरे भल्लूकवेषधारी अब्दुलः तत्र प्राप्तः। गौः अपि मञ्चं समागता। ततः अस्माकं

# 3/N 882

Seat Number | | | | | | |

> पुरतः खाद्यस्य योजना कृता। सहभोजनस्य प्रारम्भे जाते उत्तेजितैः प्रेक्षकैः आनन्देन तालिकावादनम् आरब्धम्। पूर्वमपि व्याघ्रभल्लूकौ मानुषौ एव। तथापि सा धेनुः ताभ्यां सह कार्यक्रमं कर्तुम् अभ्यस्ता आसीत्। अचिरादेव न इमौ परिचितौ व्याघ्रभल्लूकौ इति धेन्वा लक्षितम्। सम्भ्रमेण संशयेन च एकैकशः आवां दृष्टवती। यदा च तस्याः प्रत्ययः जातः तदा शृङ्गे उन्नम्य नौ आक्रामत्। अहमपि गर्जनां कृत्वा तीक्ष्णदन्तान् दर्शितवान्। किन्तु न किञ्चिदपि भयं तस्याः। अब्दुलः तां हस्तेन ताडितवान्। तेन क्षुब्धा सा तम् अन्वधावत्। भल्लूकः तदा चापल्येन पटमण्डपस्तम्भम् आरूढवान्। इयं सर्वा क्रीडा पूर्वनियोजिता इति विचिन्त्य प्रेक्षकाः अपि प्रमुदिताः। भल्लूकः निर्गतः इति क्रुद्धा सा धेनुः अधुना व्याघ्रं मां लक्ष्यं कृतवती।
>
> भीत्या अहं चतुष्पादविशिष्टं व्याघ्रत्वं विस्मृत्य द्विपादं मूलस्वरूपमाश्रितवान्।

**(1) अवबोधनम्। (4 तः 3)** 3

(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। 1

(1) अस्माकं पुरतः .......................... योजना कृता।

(खाद्यस्य/पेयस्य)

(2) अब्दुलः तां .......................... ताडितवान्।

(पादेन/हस्तेन)

(ख) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः।

(ग) पूर्णवाक्येन उत्तरं लिखत। 1

कैः आनन्देन तालिकावादनम् आरब्धम् ?

P.T.O.

(घ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत। 1

गौः अपि मञ्चं समागता।

(2) **शब्दज्ञानम्। (3 तः 2)** 2

(क) गद्यांशात् 2 षष्ठी-विभक्त्यन्त-पदे चित्वा लिखत। 1

(ख) विशेषण-विशेष्ययोः मेलनं कुरुत। 1

| 'अ' | 'आ' |
|---|---|
| (1) वर्तुलाकारम् | नौ |
| (2) परिचितौ | पीठम् |
| | व्याघ्रभल्लूकौ |

(ग) उत्तरपदं लिखत। 1

(1) अचिरादेव = अचिरात् + ....................।

(2) तथापि = तथा + ..............................।

(3) **पृथक्करणम्।** 2

क्रमेण योजयत।

(1) भल्लूकस्य पटमण्डपस्तम्भम् आरोहणम्।

(2) धेनोः सम्भ्रमः आक्रमणं च।

(3) चिमणरावस्य व्याघ्रत्वं विस्मृत्य द्विपादरूपाश्रयः।

(4) सहभोजनस्य प्रारम्भः।

# 5/N 882

Seat Number | | | | | | | |

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **7**

तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि। त्वं तु प्रजाहितदक्षः नृपः। यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज। खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत्। पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः।

(1) **अवबोधनम्। (4 तः 3)** **3**

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत। 1

पृथुभूपेन स्वधनुः सज्जीकृतं यतः ..............................।

(1) सः शत्रुं हन्तुम् इच्छति स्म।

(2) सः धनधान्यादि सर्वं वस्तुजातं वसुन्धरायाः प्राप्तुम् इच्छति स्म।

(ख) कः कं वदति ? 1

''त्वं तु प्रजाहितदक्षः नृपः।''

(ग) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ? 1

P.T.O.

(घ) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

पर्जन्यानन्तरं फलेभ्यः अङ्कुराः उद्भूताः।

(2) **शब्दज्ञानम्। (3 तः 2)** 2

(क) गद्यांशात् 2 पूर्वकालवाचक-ल्यबन्त-अव्यये चित्वा लिखत। 1

(ख) प्रश्ननिर्माणं कुरुत। 1


जनाः धान्यबीजानि अवपन्।

(ग) लकारं लिखत। 1

पिता दुःशासकः वेनराजः राजधर्मस्य पालनं न अकरोत्।

(3) **पृथक्करणम्।** 2

**जालरेखाचित्रं पूरयत।**



Seat Number

(इ) माध्यमभाषया सरलार्थं लिखत। (2 तः 1) 4

(1) सूतः – धृताः प्रग्रहाः। अवतरतु आयुष्मान्।

दुष्यन्तः – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावत् गृह्यताम्। (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः – तथा। (इति निष्क्रान्तः।)

(2) श्रोतृवृन्दः – भोः पुराणिकवर्य, कथं नदी अस्माकं माता ? कीदृशाः नदीनाम् उपकाराः ?

कीर्तनकारः – शृणुत आर्याः शृणुत। अतिप्राचीना खलु एषा कथा। अस्ति विश्वामित्रः नाम कुशिकपुत्रः मुनिवरः। सपरिवारं, सगोधनं सः दूरतः आगतः। मार्गम् आक्रामन् सः विपाट् तथा शुतुद्री एतयोः नद्योः सङ्गमं प्राप्तः।

(ई) माध्यमभाषया उत्तरं लिखत। (2 तः 1) 2

(1) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

(2) 'स नरः शत्रुनन्दनः' इति वचनं कथायाः आधारेण स्पष्टीकुरुत।

## तृतीयः विभागः—पद्यम्

18

3. (अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। 4

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥

रामाभिषेके जलमाहरन्त्या
हस्तात् सृतो हेमघटो युवत्याः।
सोपानमार्गेण करोति शब्दं
ठंठं ठठं ठं ठठठं ठठं ठः॥

(1) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (3 तः 2) 2

(क) पूर्णवाक्येन उत्तरं लिखत।

कः शब्दं करोति ?

Seat Number | | | | | | | |

(ख) विशेषण-विशेष्ययोः मेलनं कुरुत। 1

| 'अ' | 'आ' |
|---|---|
| (1) बहवः | क्षणम् |
| (2) न्याय्यात् | अम्भोदाः |
| | पथः |

(ग) सन्धिविग्रहं कुरुत। 1

नैतादृशाः = ........................ + ........................ ।

(2) स्तम्भपूरणं कुरुत। 2

| | | | |
|---|---|---|---|
| नीतिनिपुणाः | निन्दन्तु | .................... | वा |
| .................. | समाविशतु | .................... | वा |
| मरणम् | अद्यैव | .................... | वा |

(आ) माध्यमभाषया उत्तरं लिखत। (2 तः 1) 2

(1) जटायुरावणयोः सङ्घर्षस्य वर्णनं कुरुत।

(2) 'वैद्यराज नमस्तुभ्यम्............' अस्य श्लोकस्य स्पष्टीकरणं लिखत।

(इ) पद्ये शुद्धे पूर्णे च लिखत। (क, ख तः 1, ग, घ तः 1) 6

(1) (क) प्रथमवयसि .................................. विस्मरन्ति॥ 4

अथवा

(ख) भिक्षुः ........................................................ वः॥

P.T.O.

(2) (ग) यादृशं ........................................ फलम्॥ 2

**अथवा**

(घ) अल्पानामपि ........................................ मत्तदन्तिनः॥

**(ई) अन्वयं पूरयत।** 2

........................................ आत्मनः ........................................ बध्यन्ते।

तत्र बकाः न ........................................। (अतः) ........................................ सर्वार्थसाधनम्।

**(उ) माध्यमभाषया सरलार्थं लिखत। (3 तः 2)** 4

(1) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्। 2

वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम्॥

(2) यथैव सकला नद्यः प्रविशन्ति महोदधिम्। 2

तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः॥

(3) षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः। 2

तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः॥

## चतुर्थः विभागः—लेखनकौशलम् 9

4. **(अ) धातूनाम् अव्ययानां च विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (6 तः 4)** 4

(क) साकम्

(ख) गम्-गच्छ् (1 प. प.)

(ग) समीपे

(घ) क्रुध् (4 प. प.)

(च) वि + रम् (1 प. प.)

(छ) अलम्

Seat Number

अथवा

संस्कृतानुवादं कुरुत। (6 तः 4) 4

(1) शारदेचे वाहन मोर आहे.

मोर शारदा का वाहन है।

Peacock is the vehicle of Sharada.

(2) मी देवाला नमस्कार करतो.

मैं ईश्वर को नमस्कार करता हूँ।

I bow down to God.

(3) गावात एक ग्रंथालय आहे.

गाँव में एक ग्रंथालय है।

There is a library in the village.

(4) सिंह पशूंचा राजा आहे.

सिंह पशुओं का राजा है।

Lion is the king of animals.

(5) घराच्या पाठीमागे मैदान आहे.

घर के पीछे मैदान है।

There is a playground behind the house.

(6) झाडावरून आंबा पडला.

पेड़ से आम गिरा।

A mango fell from a tree.

(आ) 5-7 वाक्यात्मकं निबन्धं लिखत। (3 तः 1) 5

(1) भारतीयं प्रसिद्धं स्थलम्।

(2) मम प्रियः खगः।

(3) मम प्रिया भाषा।

अथवा

साहाय्यक-शब्दानाम् आधारेण 5-7 वाक्यात्मकं चित्रवर्णनं कुरुत। 5




(मञ्जूषा – तिष्ठति, गायति, उपविशति, वन्दते, अस्ति, वादयति)

**13/N 882**

Seat Number | | | | | | | |

**पञ्चमः विभागः—भाषाभ्यासः** 17

5. (अ) तालिकापूर्तिं कुरुत। 8

(1) नामतालिका। (6 तः 4) 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ................ | ................ | वाचः | द्वितीया |
| ................ | कव्योः | ................ | सप्तमी |
| भगवते | ................ | ................ | चतुर्थी |

(2) सर्वनामतालिका। (6 तः 4) 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| यस्मात् | ................ | ................ | पञ्चमी |
| ................ | युवाम् | ................ | प्रथमा |
| ................ | ................ | एभिः | तृतीया |

(3) क्रियापदतालिका। (6 तः 4) 2

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लङ् | अभक्षयत् | .............. | .............. | प्रथमः |
| लट् | .............. | .............. | लभध्वे | मध्यमः |
| लृट् | .............. | पठिष्यावः | .............. | उत्तमः |

P.T.O.

(4) धातुसाधित-विशेषण-तालिका। (6 तः 4) 2

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| मन् (4 आ.प.) | मतः | ............. | मन्तव्यः | ............. |
| पूज् (10 प.प.) | ............. | पूजितवान् | ............. | पूजयन् |
| लिख् (6 प.प.) | ............. | लिखितवान् | ............. | लिखन् |

(आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 3) 9

(1) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 तः 3) 3

(क) अस्ति ................................ (1) चम्पकं नाम अरण्यम्।

(सङ्ख्यावाचकम्)

(ख) आर्यभट्टः इति भारतवर्षेण प्रेषितः ............... (1) उपग्रहः।

(क्रमवाचकम्)

(ग) भोजने ................ (6) रसेषु मधुरः रसः मम प्रियः।

(सङ्ख्यावाचकम्)

(घ) ................ (2) भवने योगेशः निवसति।

(क्रमवाचकम्)

(च) वर्षस्य ............... (4) परीक्षा भवति।

(आवृत्तिवाचकम्)

# 15/N 882

Seat Number

(2) समासानां तालिकापूर्तिं कुरुत। (5 तः 3) 3

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | मृगशृगालौ | ................। | इतरेतर द्वन्द्वः। |
| (ख) | सविनयम् | विनयेन सह। | ...............। |
| (ग) | ...............। | मातुः सेवा। | षष्ठी-तत्पुरुषः। |
| (घ) | गृहस्थः | ...............। | उपपद-तत्पुरुषः। |
| (च) | ...............। | सूक्ष्माः कणाः। | कर्मधारयः। |

(3) समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 तः 3) 3

(क) प्राचीनाः × ....................................।

(ख) रासभः = ....................................।

(ग) सुगमः = ....................................।

(घ) धनम् = ....................................।

(च) साधवः × ....................................।

P.T.O.

(4) **सूचनानुसारं कृतीः कुरुत। (5 तः 3)** 3

(क) वयं महाभागस्य नामधेयं जानीमः। (वाच्यपरिवर्तनं कुरुत।)

(ख) मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत्।

(पूर्वकालवाचकं त्वान्त-अव्ययं निष्कासयत।)

(ग) अपि भवती संस्कृतं पाठयति ?

('भवती' स्थाने 'त्वं' योजयत।)

(घ) जटायुः रावणस्य गात्रे व्रणान् चकार।

(वाक्यं लङ्लकारे परिवर्तयत।)

(च) पुत्रः पत्रं लिखति। (पिता) (णिजन्तं कुरुत।)

## षष्ठः विभागः—अपठितम् 8

6. (अ) **गद्यांशं पठित्वा कृतीः कुरुत। (6 तः 4)** 4

दक्षिण-भारते सागर-मध्ये एकं लघुद्वीपं वर्तते। तस्मिन् द्वीपे सागरतरङ्गैः क्षाल्यमानं प्राचीनं नगरं कन्याकुमारी इति अस्ति। त्रयाणां सागराणां जले प्रतिबिम्बितं

**17/N 882**

**Seat Number** | | | | | | | |

| |
|---|
| सूर्योदयस्य दृश्यम् अद्भुतमेव। सूर्यस्य क्रमशः अरुणा पीता धवला च शोभा दर्शकान् मन्त्रमुग्धान् करोति। एकदा स्वामिविवेकानन्दः समुद्रजले स्थितायामेकस्यां विशालायां शिलायाम् उपविष्टः त्रीणि दिनानि ध्यानमग्नः जातः। एतस्यां शिलायाम् एव विवेकानन्दकेन्द्रम् अस्ति। अत्र आगत्य साधकाः ध्यानं साधनां च कृत्वा जीवनं सफलं कुर्वन्ति। |

(1) **पूर्णवाक्येन उत्तरं लिखत।** 1

दक्षिणभारते सागरमध्ये किं वर्तते ?

(2) **प्रातिपदिकं लिखत।** 1

(क) सागराणाम्

(ख) तस्मिन्

(3) **वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

चन्द्रस्य शोभा दर्शकान् मन्त्रमुग्धान् करोति।

(4) **माध्यमभाषया सरलार्थं लिखत।** 1

एतस्यां शिलायाम् एव विवेकानन्दकेन्द्रम् अस्ति।

P.T.O.

(5) गद्यांशात् 1 अव्ययं चित्वा लिखत। 1

(6) **कारकपरिचयं कुरुत।** 1

त्रयाणां सागराणां जले प्रतिबिम्बितं सूर्योदयस्य दृश्यम् अद्भुतमेव।

**(आ) (1) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** 2

कन्या वरयते रूपं, माता वित्तं पिता श्रुतम्।

बान्धवाः कुलम् इच्छन्ति, मिष्टान्नम् इतरेजनाः॥

(क) **पूर्णवाक्येन उत्तरं लिखत। (2 तः 1)** 1

(1) के कुलम् इच्छन्ति ?

(2) कन्या किं वरयते ?

(ख) **समानार्थकं शब्दं लिखत।** 1

पिता = ………………………………… ।

Seat Number

(2) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत। 2

आचारः कुलम् आख्याति, देशम् आख्याति भाषणम्।

सम्भ्रमः स्नेहम् आख्याति, वपुः आख्याति भोजनम्॥

